**22R/19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम्.ए.) नियमित

## परीक्षा: जानेवारी – २०२३

## सत्र १ ले

**विषय: सामान्य व्याकरण** (19R3104/22R311)

| **दिनांक:** ०३/०१/२०२३ | **गुण : ६०** | **वेळ : स. १०.०० ते १२.३०** |
|---|---|---|

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. विषयमेकमधिकृत्य निबन्धो लेख्यः।** **(१०)**

अ. दीपावलिरियं रम्या।

ब. देशभक्तिः गरीयसी।

क. कुतो विद्यार्थिनः सुखम्।

**प्र.२. द्वयोः माध्यमभाषया अनुवादं कुरुत।** **(१०)**

**अ)** मार्गे कस्मिंश्चिदरण्ये कोऽप्यजगरस्तमग्रसत। तद् दृष्ट्वा तस्य भार्या भूमौ पतिताक्रन्दत्। अजगरो मनुष्यवाण्या तामवदत् भद्रे, किमाक्रन्दसि तदा सा ब्राह्मणी प्रत्यवदत्– कथं न क्रन्दामि एतस्मिन् विदेशे दुःखिताया मम भिक्षापात्रं त्वयाऽद्य हृतम्। तच्छ्रुत्वाऽज़गरः स्वमुखात् विशालं सुवर्णपात्रमुदगिरद् ब्राह्मण्यै दत्त्वा चाभाषत एतत्तव भिक्षापात्रं भवतु। तदा पतिव्रता ब्राह्मणपत्नी तमजगरं पुनरवदत्। एतस्मिन् भिक्षापात्रे को मह्यं भिक्षां यच्छेत्। अजगरः प्रत्यवदत् भद्रे, अलं विषादेन। यस्तुभ्यं भिक्षां न यच्छेत्तस्य शिरः शतधा भग्नं भवेत्। सत्यमेवोक्तं मया। तत्क्षणमेव सा साध्वी भिक्षापात्रंव्याहरत्। यद्येवं तर्हि सत्वरमेतस्मिन् भिक्षापात्रे मह्यं भर्तृभिक्षां प्रयच्छ। एवं ब्राह्मण्या भर्तृभिक्षां याचितः सो।ज़गरो यज्ञसोमं जीवन्तमेव मुखादुदगिरत्। अनन्तरं च दिव्यपुरुषो भूत्वाव्दत्। साध्वि, विद्याधराणामधिपोऽहं मुनिशापादजगरोऽभवम्। इदानीं त्वया सह संभाषणेन शापान्मुक्तोऽस्मि।

**आ)** मणिलालः हसन् वदति– एकदा केचन जनाः नौकया गङ्गानदीं तरन्ति स्म। तेषु एकः पण्डितः आसीत्। सः तस्य पाण्डित्यं कथयति स्म। स्वस्य सहप्रयाणिकानां समीपे सः वेदान्, वेदान्तं, दर्शनानि पठितवान् अस्ति इति उक्तवान्। अनन्तरमेकं सहप्रयाणिकं पृष्टवान्– तव वेदान्तस्य परिचयः जातः? सहप्रयाणिकः नम्रतया न स्वामिन्निति अवदत्। पण्डितेन पृष्टमपि शास्त्राणि पठितानि। तेन पुनः सविनयं नेत्युक्तम्। पण्डितस्यास्य गर्वस्य वचनमग्रे सरदासीत्।

**इ)** नदी – रे विश्वामित्र! नैव विरमावः त्वत्कृते। नैव कुर्वः देवेन्द्रस्य कार्ये अधिक्षेपम्।

विश्वामित्रः – नैव मातः! मास्तु देवेन्द्रस्य अवज्ञा। केवलमिच्छामः परतीरं गन्तुम्। हे मातः! प्रसीद। वयं सर्वे तव पुत्राः एव। न वयं कदापि तव उपकारान् विस्मरामः। न किञ्चिदपि अस्माभिः कर्तव्यं येन तव अधिक्षेपः भवेत् । एषा मे प्रतिज्ञा।

नदी (विपाट्) - किम्? एषः मर्त्यः मां माता इति सम्बोधयति?

नदी (शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु कच्चित तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति?

विश्वामित्रः – न हि मातः, नैतत् शक्यम्। सर्वाः सरितः सुखं वहन्तु। सर्वे जनाः सुखिनः सन्तु। (विश्वामित्रः निर्गच्छति।)

**प्र.३. द्वयोः अन्वयं लिखित्वा माध्यमभाषया अनुवादं कुरुत।** **(१०)**

**अ)** धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहनी सत्यं मित्रमिदं दया च भगिनी भ्राता मनःसंयमः।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं ह्येते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ।।

**आ)** हे हेमकार परदुःखविचारमूढ किमां मुहुःक्षिपसि वारशतानि वह्नौ।
संदीप्यते मयि सुवर्णगुणातिरेकः लाभः परं तव मुखे खलु भस्मपातः।।

**इ)** सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणां गुणलुब्धाः स्वयमेव संपदः।।

**प्र.४. संस्कृतभाषया अनुवदत।** **(१०)**

१) तुझी आजी कुठे राहते?
२) दोन महिला हातात दिवा आणि डोक्यावर घडा ठेऊन जात होत्या.
३) सज्जनांना कोणापासून भय असणार?
४) वेळ कधीही वाया घालवू नये.
५) रस्त्याच्या दोन्ही बाजूंनी झाडे आहेत.
६) जेव्हा वेळ असेल तेव्हा मी गावाला जाईन.
७) त्या झाडावर बसून पाच माकडांनी पिकलेली फळे खाल्ली.
८) वनवासात पांडवांना धौम्य ऋषींनी उपदेश केला.
९) सैनिक देशाच्या सीमेवर राहतात.
१०) विचार करुन बोलावे.

**प्र.५. सूचनानुसारम् उत्तरत।**

१) नामनिर्देशपूर्वकं समासविग्रहं कुरुत। **(०३)**
अ. युकालिक्षम् आ. निर्मलम् इ. त्यक्तशस्त्रः

२) वाच्यपरिवर्तनं कुरुत। **(०२)**
अ. रामः भार्यां त्यक्तवान्। आ. तेन पत्यते।

३) सन्धीन् कुरुत विघटयत वा। **(०४)**
अ. द्वाविमौ आ. कविः+राजते इ. निसर्गाल्लभ्यते ई. तस्मिन्+एव

४) रूपपरिचयं लिखत। (केवलं पञ्च) **(०५)**
अ. विमुच्य आ. बभूव इ. अयम् ई. आयूंषि उ. ज्ञापयतु ऊ. व्यराजन्त

**प्र.६. सूचनानुसारं कृतीः कुरुत। (केवलं षट्)** **(०६)**

१) गुरुः शिष्यम् उपदिशति। (लङ् लकारे परिवर्तयत।)
२) सः मन्दिरं प्रविश्य नमस्कारमकरोत्। ('च' इति अव्ययं योजयत।)
३) वयं ----- विरमामः। (भाषण इति पदस्य योग्यं रूपं लिखत।)
४) असत्यवचनं त्वं मा -----। (वद् धातोः योग्यरूपं लिखत।)
५) राजा सेवकम् आदिष्टवान्। (बहुवचने परिवर्तयत।)
६) आयुर्वेदमनुसृत्य मानवशरीरे ----- दोषाः वर्तन्ते। (त्रि इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)
७) अलं -----। (विवाद इति पदस्य योग्यरूपं लिखत।)

-------------